## उपपदमतिङ् । (१९/७१२)

नित्यम् इति वर्तते । उपपदमतिङन्तं[1] समर्थेन शब्दान्तरेण सह समस्यते नित्यम्, तत्पुरुषश्च समासो भवति । कुम्भकारः । नगरकारः । अतिङ इति किम् (म.भा.१. ४१७) ? एधानाहारको व्रजति ।

ननु च सुप् सुपा इति वर्तते (म. भा. १. ४१७), तत्र [2]कुतस्तिङन्तेन समासप्रसङ्गः ? [3]एवं तर्हि ज्ञापयति एतयोर्योगयोः सुप् सुपेति न सम्बध्यते इति । तेन 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' (व्या. प. १३८) इत्येतदुपपन्नं भवति । अश्वक्रीती । धनक्रीती (४.१.५०/५०६) ॥

## अमैवाव्ययेन । (२०/७८३)

पूर्वेण समासे सिद्धे नियमार्थं[4] वचनम् । अव्ययेनोपपदस्य यः समासः सोऽमैव भवति, नान्येन । स्वादुङ्कारं भुङ्क्ते । सम्पन्नङ्कारं भुङ्क्ते । लवणङ्कारं [5]भुङ्क्ते । अमैव इति किम् ? 'कालसमयवेलासु तुमुन्' (३. ३. १६७/३१७९) – कालो भोक्तुम्[6] । [7]एवकारकरणमुपपदविशेषणार्थम् । अमैव यत्तुल्यविधानमुपपदं तस्य समासो यथा स्यात्, अमा चान्येन च यत् तुल्यविधानं तस्य मा भूत् । अग्रे भुक्त्वा, अग्रे भोजम् (३. ४. २४/३३४५) (म. भा. १. ४१८) ॥

## तृतीयाप्रभृतीन्यतरस्याम् । (२१/७८४)

अमैव इत्य[8]नुवर्तते । 'उपदंशस्तृतीयायाम्' (३. ४. ४७/३३६८) [9]इत्यतः प्रभृति यान्युपपदानि तानि अमैवाव्ययेन सहान्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति । उभयत्रविभाषेयम् । यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते, यथा 'उपदंशस्तृतीयायाम्' (३. ४. ४७/३३६८) इति । [10]यत् पुनरमा चान्येन च तुल्यविधानं तस्याप्राप्ते, यथा 'अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ' (३. ४. ५९/३३८१) इति । मूलकोपदंशं भुङ्क्ते, मूलकेनोपदंशं [11]भुङ्क्ते । उच्चैःकारमाचष्टे, उच्चैः कारम् । अमैव इत्येव, 'पर्याप्तिवचनेष्वलमर्थेषु' (३. ४. ६६/३१७८), पर्याप्तो भोक्तुम् । प्रभुर्भोक्तुम् ॥

## क्त्वा च । (२२/७८५)

अमैव इति पूर्वयोगे[12]ऽनुवृत्तम् । [13]तेनान्यत्र न प्राप्नोति इति [14]वचनमारभ्यते । क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीनि उपपदान्यन्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति । उच्चैःकृत्य । उच्चैः कृत्वा । 'अव्ययेऽयथाभिप्रेताख्याने' (३. ४. ५९/३३८१) इति क्त्वा[15]प्रत्ययः । [16]समासपक्षे ल्यबेव[17] । तृतीया–प्रभृतीनीत्येव, अलं कृत्वा । खलु कृत्वा ॥

---

1. च समर्थं इत्यधिकम् क, समर्थं यत् पदं इत्यधिकम् ड. 2. कुतः तिङः प्रसङ्गः ब.क.ड.इ, तिङप्रसंगः क. ड. फ. ह. 3. एतत् [illegible] फ. ड. 4. इदं इत्यधिकम् क. 5. भुङ्क्ते नास्ति फ. 6. वेला भोक्तुं, समयो भोक्तुम् इत्यधिकम् क. ड. फ. ह. 7. एवकारः उपपदविशेषणार्थः फ. 8. अनु नास्ति फ. 9. इत्येतद्प्रभृतीनि ग, इत्यतः प्रभृतीनि क. 10. तत् फ. 11. भुङ्क्ते नास्ति फ. 12. निवृत्तं ह. 13. तेन पूर्वेण क. 14. वचनमिदं ह. 15. प्रत्ययः नास्ति फ. 16. समास नास्ति फ. 17. एव नाति क.